ECONSPEAK: A Journal of Advances in Management IT & Social Sciences,
Vol. 9, Issue 4, April 2019 Impact Factor 5.132 ISSN: (2231-4571)
www.skirec.org Email Id: skirec.org@gmail.com

# वेदाङ्गशास्त्रेषु भाषाविज्ञानम्

डॉ.रणजीत कुमार झा
सहायक-आचार्य (शुक्लयजुर्वेद) संस्कृत शिक्षा राजस्थान जयपुर
(महाविद्यालय शाखा)

शब्दशास्त्रं न केवलं व्याकरणज्ञानस्यैव प्रतिपादितं वर्तते, अपितु भूगोलेतिहासादिविषयानां ज्ञानार्थमप्यस्य शास्त्रस्याद्भुतो महिमा महत्युपयोगिता चानुभूयते विद्वद्भिः । भगवता शब्दविद्याचार्येण पाणिनिना विरचितम् अष्टाध्यायीसूत्रं वैपुल्येन स्थीयते इति । समुपलभ्यमानं निखिलमपि शब्दानुशासनम् अतिशेते, चमत्करोति च चेतोऽवगतशब्द – विद्यातत्वानां सुमेधसाम् । महामुनिना अनेन अमोघेन अतुलेन प्रयत्नेन अमरतां नीता दृश्यते इति । पाणिनीयाष्टाध्याय्या गौरवं न केवलमस्माभिरेव उद्घोष्यते, ब्रह्मण आरभ्य अद्य यावत् समुपलभ्यमानस्य व्याकरणशास्त्रस्य पठन–पाठनक्रमस्य सुव्यवस्था वैज्ञानिकप्रकारश्च यथा पाणिनीये व्याकरणे दृष्टिपथं याति न तथाऽन्येषु व्याकरणेषु ।

अतो विविध–व्याकरण–शास्त्रकर्तृ–महर्षिमणिमालायां मध्यमः सुमेरुरिव महर्षिः पाणिनिः चिराय जागर्ति। महामतिः पाणिनिः शब्दागमनिधिं जगद्गुरूं साम्बं शिवं प्रसाद्यव्याकरणज्ञानं लेभे इत्युच्यते, अनुभूयते च तस्य अष्टाध्यायी – रचनया । एतस्या वैज्ञानिकं निरूपणं अद्यापि अखिलं जगन्मोहयति ।

तेन मुनिना धातुसूत्रगणोणादिः वाक्यलिङ्गानुशासनम् इति पञ्चविधं शब्दानुशासनं विरचितम्। धातुपाठः, अष्टाध्यायीसूत्रपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनम् इति समुदितमेतत् पञ्चपाठी इत्युच्यते सर्वविदितमेतत् । समुदितमेतत् पठित्वा एव अधीताष्टाध्यायीक इति मन्तव्यम् । तेषु पञ्चविधिषु व्याकरणेषु एतान् शब्दान् कोटिद्वये विभजति महर्षिः पाणिनिः ।

१. धातुः २. प्रातिपदिकञ्च । तत्र नाम अव्यय उपसर्ग – निपातानां प्रातिपदिकेऽन्तर्भावः । तत्राव्ययनिपातोसर्गेभ्यः परस्य सुप्प्रत्ययस्य लुप्यमानत्वात् सुबन्तानामपि तेषां विकारो न दृश्यते इति शब्दस्वरूपस्य वर्णनं प्रतिभाति । तदिदं व्याकरणं शास्त्रं गीर्वाणभाषायां न केवलं शब्दसाधुत्वमात्रबोधकं किन्तु दर्शनपदवीं प्रापितं मोक्षहेतुभूतं जाघुष्यते[1] ।

भगवान् पतञ्जलिरपि–एकः शब्दः सम्यग् ज्ञातश्चेत् स्वर्गे लोके च कामधुग् भवति इति कथयामास । तत्र व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन, इति वि+आङ्पूर्वकात् कृधातोः करणाधिकरणयोश्च–३/३/११७ इति सूत्रेण करणे ल्युटि, व्याकरणशब्दो निष्पद्यते[2] । एतेन शब्दसाधुत्वबोधसाधनं यत् शास्त्रं तदेव व्याकरणमिति निगद्यते। तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ, इति भगवदुक्त्या सर्वत्र --

1- महाभाष्ये रूद्रधरटीकायां सविस्तृतमुल्लिखितं वर्तते।

2- पाणिनि–अष्टाध्यायी सूत्रकमांक–3/3/117

कार्याकार्यव्यवस्थितौ साधुत्वासाधुत्वनिर्णये शास्त्रमेव प्रमाणत्वेन स्वीक्रियते। ततः व्याकरणं शब्दानुशासनञ्च इति शब्दौ पर्यायभूतौ वर्तेते ।

सुरगवीमुपजीव्य वैज्ञानिकपद्धत्या व्यवस्थितो हृदयङ्गमो विचारो यथा भारतभुवलये अभूत् न तथा विमर्शो देशान्तरेषु इति विदन्त्येव विज्ञाः । संस्कृतभाषायाः श्रेणीविभागः, प्रकृतिप्रत्यया-र्थविचारः, पदवाक्यानां मूलशब्दगवेषणम्, निखिलस्यापि जगतः शब्दकारणतान्वेषणं भारतीय - शाब्दिकानामनुपमं कर्म दर्श-दर्श पाश्चात्या विपश्चित् आश्चर्यवारिधौ निपतन्ति ।

अस्यैव देशस्य भागधेयमेतद् यदब्दानि यावत् तपस्तप्त्वा पाणिनीयव्याकरण- सदृशानि शब्दशास्त्राणि मनीषिणो निर्मितवन्तः, येन देशस्यास्य गौरवमद्यापि विजृम्भते भाषान्तरशब्दविदाञ्च यशांसि लोपं गच्छन्ति । भारतीयशब्दविदां विदुषां प्रयत्नैनैवेयं सुरगवी अद्यापि जीवति । नियतस्य व्याकरणशास्त्रस्य अभावाद् अनेका भाषा : विलोपं गता अगम्यार्था वा अभूवन् । पाणिनीयव्याकरणशास्त्रस्य अध्ययन - स्यैवायं परिणामो यद् पाणिनीयं गणपाठविचारनामाभिधेयं नवीनं शास्त्रमेकं जन्म लेभे ।

किञ्च विदितमेतत् सर्वेषामाचार्यगुरुप्रवराणां यत् सर्वेष्वपि व्याकरणेषु प्राधान्यं पाणिनीयव्याकरणस्यैव । तथा चोक्तं भगवता भाष्यकारेण पतञ्जलिना पूर्वापरप्रथमचरमतयाल्पार्धकतिपयनेमाश्च-२ पा०सू० २/१/५८ इत्यादिसूत्रे भाष्ये सर्ववेदपारिषदं हीदं शास्त्रम् इति । व्यासेनापि कथितम्-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन** । इति ।

इदञ्च व्याकरणजन्यशास्त्रं ज्योतिषामपि ज्योतिः, यतो हि शब्दो ज्योतिः, तस्य प्रकाशनम्=अन्वाख्यानम्=प्रकृतिप्रत्ययतदर्थप्रतिपादनं व्याकरणमेव करोति। तथा चोक्तं दण्डिना काव्यादर्शे--

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्यातिरासंसारं न दीप्यते ।।** इति ।

शब्दशास्त्रं समधिगत्य स्वाशयं प्रकाशयद्भिः भर्तृहरिपादैः प्रतिपादितम्---

**१.पाणिनिव्याकरणस्य विश्लेशणात्मकमध्ययनम् इति ग्रन्थे २४३ तमे पृष्ठे- २. पाणिनिसूत्रम् २/१/५८ ३.महाभारते व्यासेन प्रोक्तम् इति । ४. काव्यादर्शे दण्डिणोक्तम्**

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धितिः ।।1 इति

पदमञ्जरीकारा हरदत्तमिश्रा अप्यवोचन् शब्दानुशासनप्रस्तावे-

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ।।
रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ।। इति2

चिकित्साऽध्यात्मादिशास्त्रवद् व्याकरणशास्त्रमपि लोकानामत्यन्तोपायोपकारकम् समर्थितमेतद् भर्तृहरिणा इति ।

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः ।
चिकित्सालक्षणाध्यात्मशास्त्रस्तेषां विशुद्धयः ।।

इति व्याकरणमभिनन्दयन् भगवान् पतञ्जलिः शेषावतारोऽप्याह–

**सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयते इति**4 व्याकरणमहाभाष्ये शि० सू० पृ० १०२ तमे वर्णितम् ।४ एवञ्चानुशासनतः श्रेष्ठस्य गुणतो गरिष्ठस्य दुर्मेधसो दविष्ठस्य मुख्यवेदाङ्गत्वेन लब्धप्रतिष्ठस्य शब्दानुशासनस्य तदङ्गत्वेन गणपाठविचारपदार्थस्य सम्प्रति स्वरूपं श्रीमतां समक्षं समुपस्थाप्यते । शब्दसाधुत्वप्रतिपादनपरेषु तेषु तेषु आकरग्रन्थेषु सम्यक्समीक्ष्यमाणेषु गणपाठविचारपदार्थगतशब्दानुशासनस्य अनेकानि स्वरूपाणि समुपलभ्यन्ते ।

एतेनेदं वक्तुं शक्यते यज्जनैः कामं प्रयुज्यमाना पुनः पुनर्व्यवह्रियमाणा काचन वाग् यदा लोकभाषात्वमाप्नोति, विस्तरञ्चैति यदा भाषान्तरसम्पर्कात् साङ्कर्यदोष–मादधाति, तदा तस्याः स्वरूपनिर्धारणाय सीमानियमनाय च प्रयतमाना विद्वांसः काँश्चन नियमान निबध्नन्ति । तेषामेव नियमानां व्याकरणजन्यगणपाठसूत्रपदार्थ – चिन्तनपदेन व्यपदेशो भवति। तत्रापि निश्चयेन खलु वेदाङ्गादीनामेव योगदानं भवति। तात्पर्यमिदं यत् शब्दानां निष्पन्नानामेव लघुना यत्नेन ज्ञानं साध्यतेऽनेन व्याकरणेन, न तु नवीनानां शब्दानां निष्पादनं क्रियते।

----------------------------------------------------------------------------------------------------

१.काशिकायाम् पदमञ्जरीकारः हरदत्तमिश्रेणोक्तम्। २. श्री भर्तृहरिपादा व्याकरणाध्ययनावसरे । ३.शेषावतारेण भगवता पतञ्जलिना महाभाष्ये प्रोक्तम्। ४. व्याकरणमहाभाष्ये शि० सू० पृ० १०२ तमे वर्णितम् ।

तथाहि व्याकरणाध्ययनं विनैव जना भाषामवगच्छन्ति प्रयुञ्जन्ति चेत्यस्योदाहरणं तु स्वमातृभाषायाः प्रयोग एव वर्त्तते। गणपाठविचारपदार्थविषये व्याकरणशास्त्रस्येतिहासे लिखितं यत् व्याकरणशास्त्रं नात्मलाभं लभमानमासीत् नापि तस्याध्ययनपरम्परा प्रसृतामासीत् तदानीमपि मानवा येषां संस्कृतभाषा व्यवहारभाषामासीत्, व्याकरणनियमज्ञानं विनापि, अर्थात् विनापि उकारेत्संज्ञकात् -वृत्- धातोर्लटि, आत्मनेपदे ते शपि गणे टेरत्वे चेति ज्ञानम्, वर्तते इति प्रयुञ्जाना आसन् । इत्थं व्याकरणाभावेकालेऽपि – जानाति, कराति इत्यादीनां प्रयोग आसीदेवेति निश्चप्रचम् । ,

महाभाष्ये भगवता पतञ्जलिना व्याकरणप्रयोजनप्रतिपादनावसरे– वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिका इति प्रोक्तम्। अनर्थकमिदं व्याकरणम् इति पस्पशाह्निके । एतेन भाष्योद्धृतवचनेन स्पष्टीभवति यत् व्यवहारे जनाः शब्दानुशासनस्य निखिलान् नियमान् नानुसरन्ति, प्रत्युत वेपरीत्यमप्याचरन्ति तु लोकानाम्- बाहुलकात्, निपातनात्, आकृतिगणात्, आप्तवचनात् सिद्ध्यति इत्यादिशब्दैः शास्त्रकारैः तत्र-तत्र गणपाठविचारपदार्थचिन्तने एतेषां शब्दानां परिगणनं

करिष्यामि ।

वस्तुत इदं वक्तुं शक्यते यत् संस्कृतशब्दा अपि सिद्धाः, तेषामर्थाः शक्तिः, लिङ्गानि च सिद्धानि सन्ति, लोकश्च ज्ञातानि भवन्ति । एवं सिद्धे सति शब्दानुशासनस्य साध्वसाधुशब्दविवेकज्ञानपूर्वकसाधुशब्दप्रयोगे धर्मः, व्याकरण - व्युत्पादिताश्च शब्दाः साधवः, अन्येऽसाधव इत्यत्र तात्पर्यमध्यवस्यति ।

अत एव पाणिनीयगणपाठसूत्रेषु चेत् चिन्तनं क्रियेत तर्हि महाभाष्ये व्याकरणस्य साक्षात् परम्परया च प्रयोजनप्रति - पादनावसरे रक्षोहागमलघ्वसन्देहानां साक्षात् प्रयोजनत्वं प्रतिपादितम् । लोके अदुहत, जहार इत्यादौ अदृष्टान् लोपागमवर्ण-विकारान् अदुह, जभार इत्यादौ वेदे दृष्ट्वा अशाब्दिको भ्रमेण पाठान्तरं कल्पयेत् । अत्र वैयाकरणस्तु न व्यामुह्येत्, वेदार्थञ्चाध्यवस्येत् । एवञ्च वेदार्थज्ञानपूर्वकं शुद्धैः तत्तन्मन्त्रैस्तद्विहितकर्मानुष्ठानेन स्वर्गसुखं लप्स्यते । तथाहि वेदाङ्गानां योगदानं भाषाज्ञाने कथं भवति, तस्याध्ययनस्य फलमिति कथमनुभवामि ? विचारोन्मुखे भाषाशास्त्रमधिकृत्य विवेचनस्य बहुविधापद्धतिमक्षिगोचरं भवति।

---

पन्थानं परिष्कर्त्तुमनेकैश्शब्दशाब्दिकैस्तपः स्वाध्यायनिरतैस्ते तेऽपि गणपाठविचारपदार्थ-चिन्तनविषयाः स्वकीयविचाराः प्रस्तुताः । महतायासेन देशस्य कोणे-कोणे प्रचारिताश्च । तत्र पद्धतेः परिष्काराय व्याकरणस्य वाक्यपदीयप्रभृतिप्रमुखाः गन्थाः, तथा च वेदाङ्गेषु स्व-स्वलक्षणप्रभृतिपरकाः ग्रन्थाः भूयांसो ग्रथिताः । यथा शब्दानुशासनस्य परमं प्रयोजनं शब्दानां व्युत्पादनम्, व्युत्पादितानाञ्च शब्दानां साधुत्वसमर्थनम् ।

तत्रापि भगवता पाणिनिना शब्दानां व्युत्पादनाय केचन नियमा विनिर्मिताः । तेषाञ्च विभाजनष्टस्वध्यायेषु कृतम्। ते चाष्टस्वध्यायेषु विभक्ता नियमाः समुदिताः सूत्रपदेन, तदवयवाश्च योगपदेन व्यवह्रियन्त इति जानन्त्येव विद्वांसः । ग्रामैकदेशे ग्रामपदवत् सूत्रैकदेशे योगे सूत्रशब्दप्रयोगश्च न विरुध्यते ।

एवमेव प्रयोगनिष्पत्तौ स्वस्वविधेयमादाय परस्परं विरुद्धानां सूत्राणां विरोधनाशाय, इष्टप्रयोगप्रतिपादनाय अनिष्टप्रयोगव्याहर्त्तनाय च तेषां सूत्राणां समुचितार्थपरिष्काराय वा भगवता पाणिनिना कानिचित् परिभाषासूत्राण्यपि प्रोक्तानि, किन्तु तावताप्यनेकेषु स्थलेषु इष्टप्रयोगनिष्पत्तौ अनिष्टप्रयोगव्यावृत्तौ सम्भावितसमस्यासमाधानाय अक्षमा अन्तेवासिनो यथा भवन्ति ।

तथा च-महांश्चासौ चन्द्रमा महाचन्द्रमा इत्यत्र आत्वं सूत्रेण साक्षाद् विधीयते, किन्तु महद्भूतश्चन्द्रमा इत्यत्र आत्वाभावः कथम् ? एवञ्च गर्गशब्दाद् यज् भवति, किन्तु परमगर्गशब्दात् तदभावः कथम् ? तथाहि तुल्यबलविरोधे यथा पूर्वापेक्षया परस्य बलवत्त्वव्यवस्था सूत्रे वर्तते तथा पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरस्य बलीयस्त्वव्यवस्था कथन्न विलोक्यते ?

ECONSPEAK: A Journal of Advances in Management IT & Social Sciences,
Vol. 9, Issue 4, April 2019 Impact Factor 5.132 ISSN: (2231-4571)
www.skirec.org Email Id: skirec.org@gmail.com

एवमनेकासां समस्यानां समाधानाय परवर्त्तिन आचार्यः भाषाविज्ञानपदार्थचिन्तनपरकाः केचन विशेषणपरकाः विचाराः समुपात्ताः । काश्चन परिभाषाः सूत्रतो लोकतश्च गवेषयामासुः। सा च परिभाषा - सङ्केतग्राहकत्वेभिन्नत्वे सति शब्दधर्मिक---- साधुत्वप्रकारकशास्त्रजन्याप्रामाण्य - ज्ञानानास्कन्दितबोधे सति पाणिनि - उच्चरित - भिन्नत्वं परिभाषात्वम् इति कथिता ।

यद्यपि व्याकरणेषु सर्वेष्वपि ग्रन्थेषु परिभाषाशब्दस्तु विलोक्यते किन्तु तस्य निर्दुष्टं लक्षणं क्वचनापि न दृश्यते । भवन्तः वै आचार्या अस्मान् प्रपाठितवन्तः - परितो व्यापृतं भाषां परिभाषां प्रचक्षते। भाष्यन्ते परितो यस्मात् परिभाषास्ततः स्मृताः। परितो भाष्यते या सा परिभाषा । विधौ नियमकारणी परिभाषा । अनियमे नियमकारिणीत्वं परिभाषात्वम्। लिङ्गवत्त्वे सति फलवत्त्वं परिभाषात्वम् इत्यादयः परिभाषालक्षणं स्वीकुर्वन्ति। परन्तु यथा एतत् सर्वलक्षणापेक्षया परिभाषेन्दुशेखर- टीकाभूतिकारस्य पूर्वोक्तं लक्षणमतीव स्पष्टं दोषरहितञ्च प्रतीयते हि सर्वं भाषाविज्ञानपदार्थचिन्तनपरमेव फलम्। अथ च तत्र-तत्र परिभाषापदं तथा शिष्टव्यवहारविषयेषु योगरूढ़म्- तदुक्तम्-

एकदेशस्थिता शास्त्रभवने याति दीपताम् ।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते ।।1

यद्यपि काश्चन परिभाषा अस्यापवादभूता अपि विलोक्यन्ते तथापि भूयस्यः परिभाषास्तथाविधा एव व्याख्यायामस्यामुपलभ्यन्ते यासां व्याख्यानं ज्ञापकफलप्रदर्शनेनैव समाप्तिमागात् । अतः परिभाषेन्दुशेखरस्य पूर्णतोऽध्ययनेन परितः प्रमाणयितुं शक्यते यदयं व्याकरणविषयकोऽन्तिमो ग्रन्थोऽप्रतिमप्रतिभस्य नागेशस्य । शब्दशास्त्रस्य पदार्थबोधे अस्य महानुभावस्य महती प्रौढिरासीत् यया प्रौढ्या स्वप्राग्वर्तिनां प्रायः सर्वेषां व्याकरणशास्त्रनिर्माणकर्त्तृणां विदुषां सिद्धान्ता आलोचिताः प्रत्याख्याताश्च । अस्तु!
अतो पाणिनीयगणपाठसूत्रचिन्तने वेदाङ्गादियोगदानानि भूयासो विद्यन्ते । तेषु योगदानेषु अन्ये अपि शास्त्राणि व्याचक्षन्ते आचार्याः । एतेषां चर्चा प्रकरणगते कृतेति व्याप्नोति काल इदानीम् ।

विदितमेव तत्र भवतां व्याकरणे त्रिषु मुनिषु आद्ये प्रथमः पाणिनिः। स चासौ अष्टाध्यायीं रचयामास । आचार्यपाणिनिर्न केवलं शब्दशास्त्रस्य ऋषिः किंवा साक्षात्कृतधर्मा अपि बभूव । वैदिकवाङ्मयविषयस्य निर्देशस्तु स्वकीये ग्रन्थे प्रतिपादितम् इति । अद्यत्वे समुपलब्धेषु शब्दानुशासनेषु पाणिनीयं शब्दशास्त्रं सर्वाङ्गसम्पन्नम् तस्य शब्दशास्त्रं न केवलं व्याकरणज्ञानस्यैव प्रतिपादितं वर्तते, अपितु भूगोलेतिहासादिविषयानां ज्ञानार्थमप्यस्य शास्त्रस्याद्भुतो महिमा महत्युपयोगिताचानुभूयते विद्वद्भिः।

१. केनचिद् विदुषा शिष्टव्यवहारेण परिभाषा परिचीयते ।

भगवता शब्दविद्याचार्येण पाणिनिना विरचितम् अष्टाध्यायीसूत्रं वैपुल्येन स्थीयते इति । समुपलभ्यमानं निखिलमपि शब्दानुशासनम् अतिशेते, चमत्करोति च चेतोऽवगतशब्द-विद्यातत्वानां सुमेधसाम्। महामुनिना अनेन अमोघेन अतुलेन प्रयत्नेन अमरतां नीता दृश्यते इति। पाणिनीयाष्टाध्याय्या गौरवं न केवलमस्माभिरेव उद्घोष्यते, ब्रह्मण आरभ्य अद्य यावत् समुपलभ्यमानस्य व्याकरणशास्त्रस्य पठन-पाठनक्रमस्य सुव्यवस्था वैज्ञानिकप्रकारश्च यथा पाणिनीये व्याकरणे दृष्टिपथं याति न तथाऽन्येषु व्याकरणेषु ।

अतो विविध-व्याकरण-शास्त्रकर्तृ-महर्षिमणिमालायां मध्यमः सुमेरुरिव महर्षिः पाणिनिः चिराय जागर्ति। महामतिः पाणिनिः शब्दागमनिधिं जगद्गुरूं साम्बं शिवं प्रसाद्यव्याकरणज्ञानं लेभे इत्युच्यते, अनुभूयते च तस्य अष्टाध्यायी - रचनया । एतस्या वैज्ञानिकं निरूपणं अद्यापि अखिलं जगन्मोहयति ।

भगवता पतञ्जलिना अपि आचार्यपाणिनेः गौरवातिशयो महता कण्ठेन समादरेण च प्रदर्शयते । तद्यथा - **१. प्रमाणभूत आचार्यो दर्भपवित्रपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयतिस्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनः पुनरियता सूत्रेण इति** - महाभाष्ये १/१/१ पृष्ठे १३४ चौखम्बा - संस्करणे विलिखितं वर्तते । कथासरितसागरे प्रथमे कथापीठलम्बके चतुर्थतरङ्गे एवमुपलभ्यते-

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत ।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्।।
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्यया ।
अगच्छत्तपसे खिन्नो विद्याकामो हिमालयम् ॥2
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ।।

---

१. महाभाष्ये १/१ / १ पृष्ठे १३४ चौखम्बा - संस्करणे विलिखितं वर्तते ।
२. कथासरितसागरे प्रथमकथापीठलम्बके चतुर्थे तरङ्गे प्रोक्तम् ।

तेन मुनिना धातुसूत्रगणोणादिः वाक्यलिङ्गानुशासनम् इति पञ्चविधं शब्दानुशासनं विरचितम्। धातुपाठः, अष्टाध्यायीसूत्रपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनम् इति समुदितमेतत् पञ्चपाठी इत्युच्यते सर्वविदितमेतत् । समुदितमेतत् पठित्वा एव अधीताष्टाध्यायीक इति मन्तव्यम्। तेषु पञ्चविधिषु व्याकरणेषु एतान् शब्दान् कोटिद्वये विभजति महर्षिः पाणिनिः । १. धातुः २. प्रातिपदिकञ्च । तत्र नाम - अव्यय उपसर्ग - निपातानां प्रातिपदिकेऽन्तर्भावः । तत्राव्ययनिपातोसर्गेभ्यः परस्य सुप्प्रत्ययस्य लुप्यमानत्वात् सुबन्तानामपि तेषां विकारो न दृश्यते इति

शब्दस्वरूपस्य वर्णनं प्रतिभाति । तदिदं व्याकरणं शास्त्रं गीर्वाणभाषायां न केवलं शब्दसाधुत्वमात्रबोधकं किन्तु दर्शनपदवीं प्रापितं मोक्षहेतुभूतं जाघुष्यते। तथा च उक्तं हरिणा-

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**
**इयं सा मोक्षमाणायामजिह्मा राजपद्धतिः ।।2**

भगवान् पतञ्जलिरपि-एकः शब्दः सम्यग् ज्ञातश्चेत् स्वर्गे लोके च कामधुग् भवति इति कथयामास । तत्र व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन, इति वि+आङ्पूर्वकात् कृधातोः करणाधिकरणयोश्च-३/३/११७ इति सूत्रेण करणे ल्युटि, व्याकरणशब्दो निष्पद्यते। एतेन शब्दसाधुत्वबोधसाधनं यत् शास्त्रं तदेव व्याकरणमिति निगद्यते । तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ इति भगवदुक्त्या सर्वत्र कार्याकार्यव्यवस्थितौ साधुत्वासाधुत्वनिर्णये शास्त्रमेव प्रमाणत्वेन स्वीक्रियते । ततः व्याकरणं शब्दानुशासनञ्च इति शब्दौ पर्यायभूतौ वर्तेते ।

पाणिनिव्याकरणे गणपाठस्य चर्चा प्रत्येकस्मिन् अध्याये वर्तते । सर्वादीनि सर्वनामानि २-१/१/२७ इत्यत्र आरभ्यते तथा च क्षुम्नादिषु च - ८/४/३९ इति पर्यन्तं प्रतिसूत्रमाकृतिगणोऽयम् इति विलिखितं वर्तते । सर्वमाहत्य २५८ सङ्ख्याकानि गणपाठे सूत्राणि निगदितानि । अत्र अष्टासु अध्यायेषु विभक्ताः गणाः आद्यक्षराण्यभिहितानि सूत्राणि यथा प्रदर्शयन्ते । यथा सर्व- विश्व - उभ-उभय इत्यादयः सर्वादिः । प्र-परा- अप-सम् इति प्रादयः।

गण् सङ्ख्याने इत्यस्माद् धातोः अचि प्रत्यये सति गणः सिद्ध्यति। ततो गणनाम समूहविशेषः । तथैव भ्वादिदशगणादीनां शकन्ध्वादिगणपठितानां शब्दानां गणना भवति। अतश्च भगवता पाणिनिना स्थले - स्थले सूत्राणि कृतानि, तत्र ये च शब्दाः सूत्रेषु नान्तर्भावाः तिरोहिताश्च स्युः ते परिगणिताः गणपाठसूत्रेषु विहिता इति।

---

१. वाक्यपदीये ग्रन्थे भर्तृहरिणा प्रोक्तम् । २. पाणिनिसूत्रम् १/१/२७
३. पाणिनिसूत्रम् ८/४/३९

अचोऽन्यादि टि इति सूत्रे शकन्ध्वादिषु पररूपं वाच्यम्, तच्च टेः समुच्चरितम् । तत्र शकन्ध्वादिविषये तत्सिद्ध्यनुगुणं पररूपं वाच्यमित्यर्थः । अतएवाह - तच्च टेरिति । यदि तू आदित्यधिकारादकारस्यैवेष्येत तर्हि मनीषा पतञ्जलिरिति न सिध्येत् ।

केचित्तु मनः पतच्छब्दयोः पृषोदरादित्वादन्त्यलोपे आकारस्यैव पररूपमाहुः । शकानां देशविशेषाणामन्धुः कूपः शकन्धुः । कर्काणां राजविशेषाणामन्धुः कर्कन्धुः । अटति इति अटा, पचाद्यचि टाप् । कुलस्य अटा कुलटा, यदि तु कुलं अटति इति विगृह्यते तदा कर्मण्यणि ङीपि कुलाटीति स्यात् । ईष उच्छे ईष गत्यादिषु। आभ्यां गुरोश्च हलः इत्यप्रत्यये ईषा । मनस ईषा मनीषा । हलस्य ईषा हलीषा । ईषा लाङ्गलदण्डः । पतन्तः अञ्जलयोऽस्मिन् नमस्कार्यत्वादिति पतञ्जलिः । तथैव मार्तण्ड इत्यत्र पररूपेणानेन मृतण्ड इति सिद्धे तत अण्यादिवृद्धिः ।

अतः शब्दज्ञानापेक्षणार्थं ज्ञानमिदानीम् आवश्यकम् । कण्ठस्थाः शब्दाः कण्ठस्थञ्च वाक्यं

कदाचिद् विस्मृताऽपि भवति, किन्तु यदि तेषां शब्दानाम् अर्थज्ञानं सुचारुतया अभ्यस्तं भवेत् तर्हि निजनिर्मितशब्दावल्यां तेषामुपस्थापनं सुकरं भवति, यद्यपि ग्रन्थकृतशब्दानां विस्मृतिः कर्थं न स्यात् । च तु वा हि क्रमेण शिक्षाप्रणाली, शिक्षणकला, च प्रारब्धा वर्त्तते, यया प्रणाल्या कलया वा विषयावबोधने भवति सौकर्यम्। अत एतादृशीं प्रणालीमनुसृत्य अध्यापिताश्छात्रा यदा अध्यापने प्रवृत्ताः भवन्ति, तदा तेषामपि किमपि काठिन्यमध्यापने न भविष्यति इति मनसि निधाय एवास्याः कलायाः प्रादुर्भावः सञ्जात इति मन्ये शोधकर्तॄणां शोधार्थिणां सचेताः भवेयुः ।

शास्त्रेण यत् प्रतिपादितं तदेव ज्ञेयमित्यर्थात् सिद्ध्यति । विषयेऽस्मिन् भाषाविज्ञानपदार्थ – ज्ञानप्रवृत्तिः ततश्च तत्र वेदाङ्गजन्यं पदार्थज्ञानं वेदादेव सन्निहितमिति । अथ च वेदाङ्गशास्त्रेषु भाषाविज्ञानं शास्त्रमनुकूलं वर्तते । तच्च शास्त्रप्रतिपादितं ज्ञानमेव सविस्तरमुपपादितमिति नेह प्रपञ्च्यते ।